शिक्षा निदेशालय, राष्ट्रीय राजधानी क्षेत्र दिल्ली
अङ्कयोजनाविश्लेषणम् (सत्रम्– 2023-24)

खण्डः- क
अपठितांश – अवबोधनम्
10 अङ्काः

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

विद्याध्ययनं समाप्य गुरुदक्षिणां दातुम् उत्सुकः कौत्सः एकदा गुरुम् उपगम्य आत्मनः इच्छां प्रकटितवान् । कौत्सस्य वचनं श्रुत्वा गुरुणा कथितम् - " तव विशुद्धया श्रद्धया उत्कृष्टभावनया , परम - सेवया च नितान्तमस्मि प्रसन्नः , अतः गुरुदक्षिणां न कामये । " आचार्यस्य वचनं श्रुत्वा कौत्सः पुनरभाषत " यदि भवन्तः मम सकाशात् दक्षिणां न ग्रहीष्यन्ति तदा मम अध्ययनं सर्वथा व्यर्थं भविष्यति इति मम विश्वासः । एवं प्रकारेण वारं वारम् अनुरोधेन कुपितः आचार्यः आदिष्टवान् - " त्वम् मम सकाशात् चतुर्दश विद्या अधीतवान् अतः चतुर्दशकोटि स्वर्णमुद्राः मह्यं देहि । " आचार्यस्य वचनं श्रुत्वा कौत्सः चिन्तामग्नः अभवत् । यत् इयत्य : मुद्राः कुतः आनेयाः ? कोऽपि दानी एतावत् धनं दातुं न समर्थः प्रतीयते । तस्मात् दातृणां मध्ये रघोः सकाशम् एव चलितव्यम् इति विचार्य कौत्सः रघोः समीपम् उपागच्छत्।

अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम् ) 1x2=2

( i ) गुरुदक्षिणां दातुम् कः उत्सुकः ? - कौत्सः
( ii ) कौत्सः किं समाप्य गुरुम् उपागच्छत् ? - विद्याध्ययनं
( iii ) वारं वारम् अनुरोधेन कः कुपितः अभवत् ? - आचार्यः
परामर्शः– छात्राः अपठितगद्यांशात् एकपदस्य समुचितोत्तरस्य अन्वेषणं कुर्वन्ति।
छात्रान् वाक्यस्य समुचितं अर्थग्रहणाय प्रेरणम्।

आ. पूर्णवाक्येन लिखत- (केवलं प्रश्नद्वयम्) 2x2=4
( i ) कौत्सस्य वचनं श्रुत्वा गुरुणा किम् कथितम् ?
( ii ) कुपित : आचार्य : किम् आदिष्टवान् ?
( iii ) आचार्यस्य वचनं श्रुत्वा कौत्सस्य मनसि का चिन्ता जाता ?

परामर्शः- (i) छात्राः अपठितगद्यांशात् आत्मावबोधनाधारेण उत्तरनिर्धारणार्थं समुचितवाक्यानां चयनं कुर्वन्ति। छात्राः अपठितगद्यांशस्य अवबोधने समर्थाः भवेयुः।

इ.) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1
परामर्शः– छात्राः अपठितगद्यांशस्य केन्द्रीयभावग्रहणे समर्थाः भवेयुश्चेत् द्वित्रिपदात्मकं शीर्षकं चेतुं समर्थाः भविष्यन्ति।
ई.) 1x3=3

(i) "विशुद्ध्या श्रद्धया" अत्र विशेषणपदं किम्?
(क) “श्रद्धया” इति समुचितम् उत्तरम्
(ख) विशुद्ध्या इति विशेष्यपदम्
(ग) विशुद्ध श्रद्धया” इति चित्तभ्रामकः विकल्पः।
(घ) तव इति असम्बद्धः विकल्पः।

(ii) पार्श्वम् इति पदस्य किं समानार्थकपदं गद्यांशे प्रयुक्तम्?
(क) मध्ये इति चित्तभ्रामकः विकल्पः।
(ख) पार्श्वम् इति असम्बद्धं विकल्पम्।
(ग) "सकाशम्" इति समुचितम् उत्तरम्
(घ) सर्वथा इतिचित्तभ्रामकः विकल्पः।
परामर्शः– पदस्यार्थस्य समुचितं ज्ञानम्।

(iii) "उपागच्छत्" इति क्रियापदस्य कर्तृपदं किम्?
(क) रघोः इतिसमीपवर्ती विकल्पः।
(ख) आचार्यः इति असम्बद्धं विकल्पम्।
(ग) विचार्य इति असम्बद्धं विकल्पम्।
(घ) कौत्सः इति समुचितः विकल्पः।
परामर्शः– वाक्यरचनायाः अभ्यासे कर्तृक्रियापदानां ज्ञानम्।

(iv) 'ग्रहीतुम्' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?
क) वारम् इति असम्बद्धं विकल्पम्।
(ख) कामये इति असम्बद्धं विकल्पम्।
(ग) दातुम् इति समुचितः विकल्पः।
(घ) कथितम् इति चित्तभ्रामकः विकल्पः।
परामर्शः– वाक्यरचनायाः अभ्यासे कर्तृक्रियापदानां ज्ञानम्।

## खण्ड: ख
## रचनात्मककार्यम् 15 अङ्काः

2. पत्रलेखनम्
स्वमित्रम् संस्कृतं पठितुं प्रेरयितुं लिखिते अस्मिन् पत्रे रिक्तस्थानानि पूरयित्वा पुनः लिखत - ( ½x10 = 5 )

जयपुरतः
दिनाङ्कः 15-12-2023

प्रिय दिनेश ,
( i ) .. ........
अत्र कुशलं तत्रास्तु तव ( ii ) .. ........ ज्ञातं यत् त्वम् नवमकक्षायां संस्कृतं पठितुं वाञ्छति । एतत् ज्ञात्वा अहम् अति प्रसन्न: ( iii )............यतोहि संस्कृतं पठित्वा वयं राष्ट्रगौरवम् अनुभवितुं ( iv )..........। इयं देवभाषा विश्वस्य सर्वासु ( v ) ..................प्राचीनतमा वैज्ञानिकी च अस्ति। विश्वस्य ( vi )................. भाषासु भारतीय भाषासु च अनेके ( vii ).............. शब्दाः प्राप्यन्ते । अस्माकम् अनेके ( viii ) ............ संस्कृते एव लिखिताः सन्ति । अतः त्वं सर्वै : ( ix ) ............. सह संस्कृतमपि पठ इति मम प्रार्थना । मातापितृभ्यां चरणयोः प्रणामान् कथय ।

तव ( X ) ................
चन्दनः

मञ्जूषा

शक्नुमः , विषयैः , अभवम् , मित्रम् , भाषासु , संस्कृतस्य , पत्रात् , अनेकासु , ग्रन्थाः , नमोनमः
उत्तराणि-

(1) नमोनमः (2) पत्रात् (3) अभवम् (4) शक्नुमः (5) भाषासु (6) अनेकासु (7) संस्कृतस्य ( 8 ) ग्रन्थाः ( 9) विषयै: (10)मित्रम्

परामर्शा:- औपचारिकस्य अनौपचारिकस्य च पत्रस्य प्रारूपस्य ज्ञानम् । छात्रेषु रचनात्मकदक्षताया: वर्धनाय पत्रलेखनस्य समये समुचितानां शब्दानां चयनकौशलस्य सामर्थ्य-संपादनम्।

3. चित्रवर्णनम् ( 1x5 = 5 )

अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते । वाक्यशुद्धि: द्रष्टव्या । अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति । वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति । प्रतिवाक्यम् अर्ध: अङ्क: भावस्य कृते अर्ध: अङ्क:च व्याकरणशुद्धतानिमित्त निर्धारितः अस्ति । मञ्जूषायां प्रदताः शब्दाः सहायतार्थं सन्ति । छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति । छात्र : स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति । मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माण कर्तुं शक्यते ।

अथवा

अनुच्छेदलखनम् -

अयं विकल्पः सर्वेषां कृते अस्ति । छात्रा: मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति ।अतः अङ्काः देयाः ।अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीया: ।

4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत– (केवलं वाक्यपञ्चकम् ) 1x5=5

( i ) अक्षित घर जाना चाहता है । Akshit wants to go home .

( ii ) राम अयोध्या से वन को गए । Ram went to the forest from Ayodhya ( iii ) यह मेरा गांव है । This is my Village .

( iv ) माता भोजन बनाती है । Mother Cooks food .

( v ) अनुज की बहिन आई । Anuj's sister came

( vi ) बालक सिंह से डरता है । The Child is afraid of the lion .

( vii ) पेड़ हमारे मित्र है । Trees are our friends .

उत्तराणि-

( i ) अक्षितः गृहं गन्तुम् इच्छति ।

( ii ) रामः अयोध्यातः वनम् अगच्छत् ।

( iii ) एषः मम ग्रामः अस्ति ।

( iv ) माता भोजनं पचति ।

( v ) अनुजस्य भगिनी आगच्छत् ।

( vi ) बालकः सिंहात् बिभेति ।

( vii ) वृक्षाः अस्माकं मित्राणि सन्ति ।

परामर्शा:- छात्रान् कर्तृपदानां क्रियापदानाम् अवबोधनम्।कारकविभक्त्यानुगुणं छात्राणां कृते वाक्यरचनाया: अभ्यास: । क्रिया कर्ताऽनुगामिनी भवेत् ।

'ग'-खण्ड:

अनुप्रयुक्त-व्याकरणम् 25 अङ्काः

5. अधोलिखितेषु वाक्येषु रेखांकितपदस्य सन्धिपदं सन्धिच्छेदपदं वा लिखत (केवलं प्रश्नचतुष्टयम्) 1x4=4

( i ) परं <u>वानरस्तु</u> कूर्दित्वा वृक्षमारूढः ।

( ii ) <u>करुणापरो</u> गृही तस्मै आश्रयं प्रायच्छत् ।

( iii ) स केनापि प्रकारेण <u>परैः + न</u> परिभूयते ।

( iv ) केचित् + वृष्टिभिः आर्द्रयन्ति ।
( v ) अमुना स्यात् + नैव जनग्रसनम् ।
परामर्शः-
(i) अभ्यासवान भव पुस्तकस्य साहाय्येन विसर्गसन्धिं बोधयत।
(ii) अभ्यासवान भव पुस्तकस्य साहाय्येन विसर्गसन्धिं बोधयत।
(iii) अभ्यासवान भव पुस्तकस्य साहाय्येन विसर्गसन्धिं बोधयत।
(iv) अभ्यासवान भव पुस्तकस्य साहाय्येन व्यञ्जनसन्धिं बोधयत।

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम्)
1x4=4
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढा धीः यस्य सः।
(क) विमूढः इति समासरहितं विकल्पम्
(ख) विमूढधीः इति समुचितम् उत्तरम्
(ग) विमूढिः इतिचित्तभ्रामकः विकल्पः।
(घ) मूढधिः इति असम्बद्धः विकल्पः।

(ii) वाक्पटुः धैर्यवान् मन्त्री सभायामप्यकातरः।
(क) वाचि पटुः इति समुचितम् उत्तरम्
(ख) वाचः पटुः इति असम्बद्धः समासः।
(ग) वाचे पटुः इति असम्बद्धः समासः।
(घ) वाचाम् पटुः इति असम्बद्धः समासः।

(iii) वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति।
(क) वृक्षेण उपरि इति असम्बद्धः समासः।
(ग) वृक्षात् उपरि इति असम्बद्धः समासः।
(ख) वृक्षम् उपरि इति चित्तभ्रामकम् उत्तरम्
(घ) वृक्षस्य उपरि इति समुचितम् उत्तरम्

(iv) आलस्यं हि मनुष्याणां शरीरस्थः महान् रिपुः।
(क) शरीरं स्थितः इति असम्बद्धः समासः।
(ग) शरीरे स्थितःइति समुचितम् उत्तरम्
(ख) शरीरस्य स्थितःइति असम्बद्धः समासः।
(घ) शरीरात् स्थितः इति असम्बद्धः समासः।

(v) सुरभेरिमाम् अवस्थां दृष्ट्वा सुराणाम् अधिपः ताम् अपृच्छत्
(क) सुरधिपः इति चित्तभ्रामकम् उत्तरम्
(ख) सुराधिपः इति समुचितम् उत्तरम्
(ग) सुराधिपतिम् इति असम्बद्धः समासः।
(घ) सुराधीः इति असम्बद्धः समासः।

7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम्)
परामर्शः– प्रत्ययानां सम्यगवबोधः। 1x4=4
पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा ।

(क) सभ्+यता इति असम्बद्धम् उत्तरम्।
(ख) सभ्य+ता इति चित्तभ्रामकम् उत्तरम्।
(ग) सभ्य+तल् इति समुचितम् उत्तरम्।
(घ) सभ्यता+तल् इति चित्तभ्रामकम् उत्तरम्।

(ii) ललितलतानां माला रमणीय +टाप् ।
(क) रमणीयता इति चित्तभ्रामकम् उत्तरम्।
(ख) रमणीया इति समुचितम् उत्तरम्।
(ग) रमणा इति चित्तभ्रामकम् उत्तरम्।
(घ) रमणीटा इति असम्बद्धम् उत्तरम्।

(iii) वाक्पटुः धैर्यवान् मन्त्री सभायामप्यकातरः ।
(क) धैर्य+मतुप् इति समुचितम् उत्तरम्।
(ख) धैर्य+वन् इति चित्तभ्रामकम् उत्तरम्।
(ग) धैर्य+आन् इति असम्बद्धम् उत्तरम्।
(घ) धैर्य+वान् इति चित्तभ्रामकम् उत्तरम्।

(iv) पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा ।
(क) पाषाण+डीष् इति चित्तभ्रामकम् उत्तरम्।
(ख) पाषाण+टाप् इति चित्तभ्रामकम् उत्तरम्।
(ग) पाषाण+ठक् इति चित्तभ्रामकम् उत्तरम्।
(घ) पाषाण+ङीप् इति समुचितम् उत्तरम्।

(v) भाषा+ठक् ज्ञानं सम्यक्तया प्राप्तव्यम्।
(क) भाषिकः इति चित्तभ्रामकम् उत्तरम्।
(ख) भाषक इति असम्बद्धम् उत्तरम्।
(घ) भाषिकम् इति समुचितम् उत्तरम्।
(ग) भाषायिकः इति असम्बद्धम् उत्तरम्।

8. वाच्यानुसारं उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं विकल्पेन पूरयत। (केवलं प्रश्नत्रयम्) 1x3=3
(i) कृष्ण: - हे पार्थ! ................ सदा धर्मस्य पक्षे भवामि।
(क) अहम् इति समुचितम् उत्तरम् । यदा छात्राणां लकारेषु गतिः भविष्यति तदैव "भवामि" इति पदं दृष्ट्वा छात्राः "अहम्" इति उचितं पदं योजयितुं शक्यते।
(ख) ईश्वरः इति चित्तभ्रामकम् उत्तरम् अत्र यदि ईश्वरपदं योजयेत् तर्हि तदनुसारं क्रियाऽपि प्रथमपुरुषस्य भवेत्।
(ग) मया इति चित्तभ्रामकम् उत्तरम्। मया सह आत्मनेपदी क्रिया अथवा क्तप्रत्यययुक्ता क्रिया स्यात्।
(घ) त्वम् इति चित्तभ्रामकम् उत्तरम्। त्वम् पदेन सह मध्यमपुरुषस्य क्रिया भवेत्।

(ii) अर्जुन:- अधुना एतत् मया ................।
(क) जानामि इति चित्तभ्रामकम् उत्तरम्। मया पदं दृष्ट्वा छात्रः प्रकृत–उत्तरं चेतुं शक्नोति।
(ख) ज्ञायते इति समुचितम् उत्तरम् । कर्मवाच्ये तृतीयान्तकर्त्रा मया सह आत्मनेपदी क्रिया भवति।
(ग) अहम् इति असंगतम् उत्तरम्।
(घ) जानीमः इति असंगतम् उत्तरम्।

(iii) कृष्ण: - यदि ................. ज्ञायते तर्हि अलं चिन्तया ।
(क) भवान् इति असंगतम् उत्तरम्। कर्तृवाच्ये कर्तरि प्रथमा, आत्मनेपदी धातुना सह कर्तरि तृतीया विभक्तिर्भवति।
(ख) त्वम् इति असंगतम् उत्तरम्। पूर्ववत् बोध्यम्।
(घ) त्वया इति समुचितम् उत्तरम् । कर्मवाच्ये तृतीयान्तकर्त्रा त्वया सह आत्मनेपदी क्रिया भवति।
(ग) अहम् इति असंगतम् उत्तरम्।

(iv) अर्जुन: - अहं अवश्यं युद्धं ................. ।
(क) करिष्यते इति असंगतम् उत्तरम्।
(ग) करिष्यामि इति समुचितम् उत्तरम् । उत्तमपुरुषस्य कर्त्रा सह उत्तमपुरुषस्य क्रिया युज्यते।
(ख) क्रियते इति असंगतम् उत्तरम्।
(घ) करोषि इति असंगतम् उत्तरम्।

9. प्रदत्तेभ्यः रिक्तस्थानेभ्यः समुचितं कालबोधकशब्दं लिखत - (केवलं प्रश्नचतुष्टयम्) 1x4=4
(i) माता 9:00 ........नववादने......... भोजनं निर्माति ।
(ii) बालका: 9:30 ........सार्धनववादने......... भोजनं कुर्वन्ति ।
(iii) अध्यापक: 10:15 .......सपाददशवादने.......... पाठं पाठयति ।
(iv) मित्राणि 11:45 .......पादोनद्वादशवादने.......... क्रीडन्ति ।
(v) पितामह: 4:30 ......सार्धचतुर्वादने........... मिष्ठान्नं ददाति ।
परामर्शः– समयस्य भाषायां ज्ञानम् अनिवार्यम्। ज्ञात्वा लिखन्तु।

10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नत्रयम्) 1x3=3
(i) कियांश: ................. नृत्यं करिष्यति। करिष्यति लृट्लकारस्य क्रियाम् अनुसृत्य छात्राः भविष्यत्कालाधारितं श्वः पदं चिनुयुः।
(ii) यावत् आरक्षकः आगच्छति ................. चौरः पलायते। यावत् पदेन सह तावत् पदस्य नित्यसम्बन्धः भवति अतः मञ्जूषा दृष्ट्वा तावत् इति पदस्य चयनं स्वाभाविकम्।
(iii) ................. रविवासरः आसीत्। आसीत् इति भूतकालिकां क्रियां दृष्ट्वा विगतदिवसस्य संगतिः स्वीकरणीया। अर्थात् अत्र ह्यः पदस्य संगतिः भविष्यति।
(iv) बुद्धिर्बलवती तन्वि सर्वकार्येषु .................। पाठस्था सूक्तिरियम् , अतः सूक्तिं ध्यात्वा सर्वदा पदस्य संगतिः करणीया।

मञ्जूषा

सर्वदा, श्वः, ह्यः, तावत्

11. अधोलिखितवाक्येषु रेखाङ्कित - अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत - ( केवलं प्रश्नत्रयम् ) (1x3=3)
परामर्शः – विशेषण–विशेष्य–परिचयः शिक्षकेन पूर्वमेव दातव्यः।

(i) हिमकर: <u>शीतला</u> भवति ।
(क) शीतलम् इति असंगतम् उत्तरम्।
(ख) शीतलानि इति असंगतम् उत्तरम्।
(ग) शीतलः इति समुचितम् उत्तरम् । हिमकरः विशेष्यं पुल्लिङ्गे वर्तते, तस्य विशेषणमपि पुल्लिङ्गे भविष्यति।
(घ) शीतला: इति असंगतम् उत्तरम्।

(ii) तौ फलानि <u>खादन्ति</u> ।
(क) खादति   इति असंगतम् उत्तरम्।
(ख) खादसि इति असंगतम् उत्तरम्।
(ग) खादतः  इति समुचितम् उत्तरम् ।
(घ) खादावः इति असंगतम् उत्तरम्। द्विवचनं परम् उत्तमपुरुषस्य अस्ति। प्रथमपुरुषेण सह प्रथमपुरुषस्य सङ्गतिः समुचिता।

(iii) <u>जलः</u> निर्मलम् अस्ति।
(क) जलम्  इति समुचितम् उत्तरम् । नपुंसकलिङ्गस्य विशेषणेन सह नपुंसकलिङ्गस्य विशेष्यम्।
(ख) जले इति असंगतम् उत्तरम्।
(ग) जलस्य इति असंगतम् उत्तरम्।
(घ) जलाय इति असंगतम् उत्तरम्।
परामर्शः– विशेषण–विशेष्यस्य ज्ञानम्।

(iv) अहं श्वः पत्रं <u>लिखामि।</u>
(क) लिखामः इति असंगतम् उत्तरम्।
(ख) लेखिष्यामि  इति समुचितम् उत्तरम् । उत्तमपुरुषस्य कर्त्रा सह उत्तमपुरुषस्य क्रिया युज्यते।
(ग) लिख्यामि इति चित्तभ्रामकम् उत्तरम्।
(घ) लिखिष्यामः इति असंगतम् उत्तरम्।

घ–खण्डः
पठितावबोधनम्

12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - ( 5 )

विचित्रा दैवगतिः । तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौर : गृहाभ्यन्तरं प्रविष्टः । तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः । चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अग्रहणाच्च परं विचित्रमघटत चौरः एव उच्चैः क्रोशितम् आरभत ' चौरोऽयम् , चौरोऽयम् ' इति । तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्र आगच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन् । यद्यपि ग्रामस्य आरक्षी एव चौर आसीत् ।

अ . एकपदेन उत्तरत । ( केवलं प्रश्नद्वयम् )  (1/2 x2 = 1 )
प्रश्नाः-
( क ) कः गृहाभ्यन्तरं प्रविष्टः ?
( ख ) चौर : : काम् आदाय पलायित : ?
( ग ) अतिथिः केन प्रबुद्धः
उत्तराणि-
(i) चौर:
(ii) मञ्जूषाम्
(iii)पादध्वनिना
परामर्श:-
छात्रा: पठितगद्यांशाद् समुचितस्य उत्तरस्य अन्वेषणे समर्था: भवेयुः।

(आ)  पूर्णवाक्येन उत्तरत        (केवलं प्रश्नद्वयम्)                1x2=2
प्रश्नाः-

( क ) तत्र किं विचित्रम् अघटत ?
( ख ) ग्रामवासिनः कम् अभर्त्सयन् ?
( ग ) क : चौरः आसीत् ?
उत्तराणि-
(i)तत्र विचित्रम् अघटत् यत् चौर: एव उच्चै: क्रोशितुम् आरभत्- "चौरोऽयम् चौरोऽयम्" इति
(ii) ग्रामवासिन: वराकमतिथिं चौर मत्वा अभर्त्सयन्।
(iii) ग्रामस्य आरक्षी एव चौर आसीत्।
परामर्श:- छात्रा: पठितगद्यांशाद् अवबोधनस्य आधारेण समुचितवाक्यस्य चयने समर्था: भवेयुः ।

(इ.) यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2
प्रश्नाः-
( क ) " पलायितः " इति क्रियायाः कर्ता क : ?
( ख ) " विचित्रा दैवगतिः " इत्यत्र विशेषणपदं किम् ?
( ग ) " उच्चैः " इति पदस्य विपरीतपदं किम् ?
उत्तराणि-
(i) चौर: (छात्राणां कृते क्रियापदानाम् एवञ्च कर्तृपदानां ज्ञानसम्पादनम्)
(ii) विचित्रा (छात्राणां कृते विशेषणविशेष्यो: ज्ञानसम्पादनम्)
(iii) नीचै: (छात्राणां कृते विपरीतपदानां ज्ञानसम्पादनम्)

13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5
आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः ।
तस्माद् रक्षेत् सदाचार प्राणेभ्योऽपि विशेषतः ।।

अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) ½ x2=1
प्रश्नाः-
( क ) कः प्रथमो धर्म : ?
( ख ) तस्मात् कं रक्षेत् ?
( ग ) प्राणेभ्योऽपि विशेषतः कं रक्षेत् ?
(i) आचार:
(ii) सदाचारं
(iii) सदाचारं
परामर्श:- छात्रा: पठितपद्यांशाद् समुचितस्य उत्तरस्य अन्वेषणे समर्था: भवेयुः।

आ. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)
1x2=2
प्रश्नाः-
( क ) किं विदुषां वचः ?
( ख ) सदाचारं कथं रक्षेत् ?
( ग ) श्लोकानुसारेण प्रथमः धर्मः कः ?
उत्तराणि-
(i) आचार:प्रथमो धर्म: इति विदुषां वच: ।
(ii) प्राणेभ्योपि विशेषत: सदाचारं रक्षेत् ।
(iii)श्लोकानुसारेण आचार:प्रथमो धर्म: ।
परामर्श:- छात्रा: पठितपद्यांशाद् अवबोधनस्य आधारेण समुचितवाक्यस्य चयने समर्था: भवेयुः ।

इ.  यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)
1x2=2

प्रश्नाः-
( क ) " प्रथमो धर्मः " अत्र विशेषणपदं किम् ?
( ख ) अन्तिमः इत्यस्य किं विलोमपदं श्लोके प्रयुक्तम् ?
( ग ) " ज्ञानिनाम् " इति पदस्य श्लोके किं पयार्यपदं वर्तते ?
उत्तराणि-
(i) प्रथमो/ प्रथम:
(छात्राणां कृते विशेषणविशेष्यो: ज्ञानसम्पादनम्)
(ii)प्रथम:
(छात्राणां कृते विपरीतपदानां ज्ञानसम्पादनम्)
(iii)विदुषां
(छात्राणां कृते समानार्थकपदानां ज्ञानसम्पादनम् , अवबोधनम् च।

14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5

काक : अरे ! अरे ! किं जल्पसि ? यदि अहं कृष्णवर्णः तर्हि त्वं किं गौराङ्गः ? अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनानां कृते । उदाहरणस्वरूपा - ' अनृतं वदसि चेत् दशेत् इति प्रकारेण । अस्माकं परिश्रमः ऐक्यं च विश्वप्रथितम् अपि च काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते ।
पिकः- अलम् अलम् अतिविकत्थनेन किं विस्मर्यते यत् - काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः । वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ।।
काक :- रे परभृत ! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः ? अतः अहं एव करुणापरः पक्षिसम्राट् काकः ।

अ.  एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) ½ x2=1
प्रश्नाः-

( क ) कः कृष्णवर्णः ?
( ख ) " अलम् अलम् अतिविकत्थनेन " कः वदति ?
( ग ) अनृतं वदसि चेत् कः दशेत् ?
उत्तराणि-
(i)काक:
(ii) पिक:
(iii) काक:
परामर्श:- छात्रा: पठितपद्यांशाद् समुचितस्य उत्तरस्य अन्वेषणे समर्था: भवेयुः।

आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)

प्रश्नाः-
1x2=2
( क ) क : आदर्शच्छात्रः मन्यते ?
( ख ) पिकः किं वदति ?

( ग ) पिकस्य सन्ततिं कः पालयति ?
उत्तराणि-
(i) काकचेष्ट: विद्यार्थी एव आदर्शच्छात्र: मन्यते ।
(ii) पिक वदति -अलम् अलम्………. काक: पिक: पिक: ।
(iii) पिकस्य संततिं काक: पालयति ।
परामर्श:-छात्रा: पठितपद्यांशाद् अवबोधनस्य आधारेण समुचितवाक्यस्य चयने समर्था: भवेयुः ।

इ यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2
प्रश्नाः-
( क ) " सत्यम् " इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?
( ख ) " काकचेष्टः विद्यार्थी " इत्यत्र विशेष्यपदं किम् ?
( ग ) ' मन्यते ' इति क्रियापदस्य कर्तृपदं किम् ?
उत्तराणि-
(i)अनृतं
(छात्राणां कृते विपरीतपदानां ज्ञानसम्पादनम्)
(ii) विद्यार्थी
(छात्राणां कृते विशेषणविशेष्यो: ज्ञानसम्पादनम्)
(iii) विद्यार्थी
(छात्राणां कृते क्रियापदानाम् एवञ्च कर्तृपदानां ज्ञानसम्पादनम्)

15. रेखाङ्कित-पदानि आधृत्य समुचितं प्रश्ननिर्माणं कुरुत-(केवलं प्रश्नचतुष्टयम्) 1x4=4
प्रश्नाः-
( i ) <u>उद्यमेन</u> समः बन्धुः नास्ति ।
( ii ) प्रजानां हिते <u>राज्ञः</u> हितं भवति ।
( iii ) अभियुक्तः <u>कृशकायः</u> आसीत् ।
( iv ) <u>विद्वांसः</u> चक्षुष्मन्तः प्रकीर्तिताः ।
( v ) <u>परेभ्यः</u> अहितं कर्म न कुर्यात् ।
उत्तराणि-
(i) केन (ii) कस्य (iii) कीदृश: (iv) के (v) केभ्य:
परामर्श:- छात्राणां कृते प्रश्नवाचकपदानां ज्ञानसम्पादनम्, किम् शब्दरूपाणां ज्ञानम्।

16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत - 1x4=4
श्लोक : -
भुक्ता मृणालपटली भवता निपीता न्यम्बूनि यत्र नलिनानि निषेवितानि ।
रे राजहंस ! वद तस्य सरोवरस्य कृत्येन केन भवितासि कृतोपकारः ।।
अन्वयः
यत्र भवता ( i ).......... भुक्ता , अम्बूनि निपीतानि ( ii ) .......... निषेवितानि रे राजहंस ! वद तस्य ( iii )........... केन कृत्येन ( iv ) ……….. भवितासि ।।
मञ्जूषा
कृतोपकारः , मृणालपटली , सरोवरस्य , नलिनानि
उत्तराणि-
(1) मृणालपटली (2 )नलिनानि 3) सरोवरस्य (4) कृतोपकार:
परामर्श: - श्लोकस्य अर्थानुसारं पदानां व्यवस्थापन- कौशलस्य सम्पादनम्
अथवा

मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -
श्लोक : -
क्रोधो हि शत्रुः प्रथमो नराणां देहास्थितो देहविनाशनाय ।
यथास्थितः काष्ठगतो हि वह्निः स एव वह्निर्दहते शरीरम् ।।

भावार्थ : - मनुष्याणां शरीरेषु स्थित : ( i )............ एव तेषां ( ii )........... विनाशस्य प्रथमः शत्रुः अस्ति । यथा ( iii )................. स्थितः अग्निः तमेव ज्वालयति तथैव क्रोधरूपाग्निः अपि जनानाम् ( iv ) ………………दहति
मञ्जूषा
देहानां ,शरीराणि , क्रोधः , काष्ठेषु
उत्तराणि-
(1)क्रोध: (2) देहानां (3) काष्ठेषु (4)शरीराणि
परामर्श:- श्लोकस्य भावार्थस्य ज्ञानं, संस्कृते अर्थलेखनस्य सामर्थ्य संपादनम्।

17. अधोलिखित-कथांशं समुचित-क्रमेण लिखत – ½ x8=4
( i ) तेन वित्तेन तत्पुत्रम् महाविद्यालये प्रवेशः दापयितुं सफलः जातः ।
(ii)तत्र निवसन् अध्ययने संलग्नः समभूत् ।
( iii ) पिता पुत्रं द्रष्टुं प्रस्थितः ।
(iv)कश्चन निर्धनः जनः वित्तमुपार्जितवान् ।
(v) सः बसयानं विहाय पदातिरेव प्राचलत् ।
( vi ) एकदा तस्य पुत्रः रुग्णः अभवत् ।
( vii ) तत्तनयः छात्रावासे वसति स्म ।
( viii ) पुत्रस्य रुग्णतामाकर्ण्य सः व्याकुलः सञ्जातः ।
उत्तराणि-
(4) (1) (5) (2) (6) (7) (3) (5)
परामर्श:-कथाया: केंद्रीय भावार्थस्य ज्ञानसम्पादनम्,वाक्यानां कथाक्रमानुसारेण योजनाया: पाठनम् ।

18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसंगानुकूलम् उचितार्थं चिनुत (केवलं प्रश्नत्रयम्) 1 x3 =3
( i ) <u>करी</u> सिंहस्य बलं वेति ।
( क ) सिंह: इति असंगतम् उत्तरम्।
( ख ) भल्लूक : इति असंगतम् उत्तरम्।
( ग ) गजः इति समुचितम् उत्तरम् ।
( घ ) सर्पःइति असंगतम् उत्तरम्।

( ii ) <u>अनृतं</u> वदसि चेत् काकः दशेत् ।
( क ) असत्यम् इति समुचितम् उत्तरम् ।
( ख ) लघुः इति असंगतम् उत्तरम्।
( ग ) स्पष्टम् इति असंगतम् उत्तरम्।
( घ ) वियोग: इति असंगतम् उत्तरम्।

( iii ) स पिता तनुजस्य रुग्णताम् <u>आकर्ण्य</u> व्याकुलः जातः । ( क ) गत्वा इति असंगतम् उत्तरम्।
( ख ) दृष्टवा इति असंगतम् उत्तरम्।
( ग ) वदित्वा इति असंगतम् उत्तरम्।
( घ ) श्रुत्वा इति समुचितम् उत्तरम् ।

( iv ) एकेन राजहंसेन या शोभा <u>सरसो</u> भवेत् -
( क ) नद्यःइति असंगतम् उत्तरम्।
( ख ) तडागस्य इति समुचितम् उत्तरम् ।
( ग ) समुद्रस्य इति असंगतम् उत्तरम्।
( घ ) नगरस्य इति असंगतम् उत्तरम्।

परामर्शः – छात्राणां कृते पर्यायपदानाम् अवबोधनम्, एवञ्च प्रसङ्गानुसारम् अर्थग्रहणस्य सामर्थ्यस्य विस्तारः।